● **चतुर्थः पाठः**

# सिद्धिमन्त्रः

## (सफलता का मन्त्र)

रामदासः नारायणपुरे निवसति। सः नित्यं ब्राह्मे मुहूर्ते उत्थाय नित्यकर्माणि करोति, नारायणं स्मरति, ततः परं पशुभ्यः घासं ददाति। अनन्तरं पुत्रेण सह सः क्षेत्राणि गच्छति। तत्र सः कठिनं श्रमं करोति। तस्य श्रमेण निरीक्षणेन च कृषौ प्रभूतम् अन्नम् उत्पद्यते। तस्य पशवः हृष्ट-पुष्टाङ्गाः सन्ति, गृहं च धनधान्यादिपूर्णम् अस्ति।

अत्रैव ग्रामे पैतृकधनेन धनवान् धर्मदासः निवसति। तस्य सकलं कार्यं सेवकाः सम्पादयन्ति। सेवकानाम् उपेक्षया तस्य पशवः दुर्बलाः क्षेत्रेषु च बीजमात्रमपि अन्नं नोत्पद्यते। क्रमशः तस्य पैतृकं धनं समाप्तम् अभवत्। तस्य जीवनम् अभावग्रस्तं जातम्।

एकदा वनात् प्रत्यागत्य रामदासः स्वद्वारि उपविष्टं धर्मदासं दुर्बलं खिन्नं च दृष्ट्वा अपृच्छत्, "मित्र धर्मदास! चिराद् दृष्टोऽसि! किं केनापि रोगेण ग्रस्तः, येन एवं दुर्बलः।" धर्मदासः प्रसन्नवदनं तम् अवदत् "मित्र! नाहं रुग्णः, परं क्षीणविभवः इदानीम् अन्य इव संजातः। इदमेव चिन्तयामि केनोपायेन मन्त्रेण वा सम्पन्नः भवेयम्।" रामदासः तस्य दारिद्र्यस्य कारणं तस्यैव अकर्मण्यता इति विचार्य एवम् अकथयत्, "मित्र! पूर्वं केनापि दयालुना साधुना मह्यम् एकः सम्पत्तिकारकः मन्त्रः दत्तः, यदि भवान् अपि तं मन्त्रम् इच्छति तर्हि तेन उपदिष्टम् अनुष्ठानम् आचरतु, मित्र! शीघ्रं कथय तदनुष्ठानं येनाहं पुनः सम्पन्नः भवेयम्।" रामदासः अवदत्, "मित्र! नित्यं सूर्योदयात् पूर्वम् उत्तिष्ठ, स्वपशूनां च उपचर्यां स्वयमेव कुरु, प्रतिदिनं च क्षेत्रेषु कर्मकाराणां कार्याणि निरीक्षस्व। अनेन तव अनुष्ठानेन प्रसन्नः सः महात्मा वर्षान्ते अवश्यं तुभ्यं सिद्धिमन्त्रं दास्यति इति।"

विपन्नः धर्मदासः सम्पत्तिम् अभिलषन् वर्षम् एकं यथोक्तम् अनुष्ठानम् अकरोत्। नित्यं प्रातः जागरणेन तस्य स्वास्थ्यम् अवर्धत्। तेन नियमेन पोषिताः पशवः स्वस्थाः सबलाः च जाताः; गावः महिष्यः च प्रचुरं दुग्धम् अयच्छन्। तदानीं तस्य कर्मकराः अपि कृषिकार्ये सन्नद्धाः अभवन्। अतः तस्मिन् वर्षे तस्य क्षेत्रेषु प्रभूतम् अन्नम् उत्पन्नम्, गृहं च धनधान्यपूर्णं जातम्।

एकस्मिन् दिने प्रातः रामदासः क्षेत्राणि गच्छन् दुग्धपरिपूर्णपात्रं हस्ते दधानं प्रसन्नमुखं धर्मदासम् अवलोक्य अवदत्, "अपि कुशलं ते, वर्धते किं तव अनुष्ठानम्? किं महात्मानं मन्त्रार्थम् उपगच्छाव?" धर्मदासः प्रत्यवदत्, "मित्र! वर्षपर्यन्तं श्रमं कृत्वा मया इदं सम्यग् ज्ञातं यत् 'कर्म' एव स सिद्धिमन्त्रः। तस्यैव अनुष्ठानेन मनुष्यः सर्वम् अभीष्टं फलं लभते। तस्यैव अनुष्ठानस्य प्रभावेण सम्प्रति अहं पुनः सुखं समृद्धिं च अनुभवामि।" तत् श्रुत्वा प्रहृष्टः च रामदासः यथास्थानम् अगच्छत्। सत्यमेव उक्तम्–

**उत्साहसम्पन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम्।**
**शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं याति निवासहेतोः।।**

# अभ्यास प्रश्न

## ● लघु उत्तरीय प्रश्न

**निम्नलिखित प्रश्नों के उत्तर संस्कृत में दीजिए—**

(१) रामदासः कुत्र निवसति?
(२) नारायणपुरे कौ निवसतः?
(३) रामदासः प्रातःकाले उत्थाय किं करोति?
(४) रामदासः कदा उत्तिष्ठति?
(५) रामदासः केन सह क्षेत्राणि गच्छति?
(६) धर्मदासस्य दारिद्रयस्य किं कारणम् आसीत्?
(७) सिद्धिमन्त्रः किम् अस्ति?
(८) रामदासः धर्मदासेन किम् अपृच्छत्?
(९) केन कारणेन धर्मदासस्य स्वास्थ्यम् अवर्धयत्?
(१०) धर्मदासः कथं सम्पन्नम् अभवत्?
(११) लक्ष्मीनिवासहेतोः कं स्वयं याति?
(१२) किम् कृत्वा मनुष्यः सर्वम् अभीष्टं फलं लभते?

## ● अनुवादात्मक प्रश्न

**(१) निम्नलिखित अनुच्छेदों का ससन्दर्भ हिन्दी में अनुवाद कीजिए—**

(अ) रामदासः नारायणपुरे ..............................अस्ति।
(ब) अत्रैव ग्रामे ..........................................जातम्।
(स) एकदा वनात् ...........................सम्पन्नः भवेयम्।
(द) रामदासः तस्य ............................दास्यति इति।
(य) विपन्नः धर्मदासः .................धनधान्यपूर्णं जातम्।
(र) एकस्मिन् दिने ..............................अनुभवामि।
(ल) उत्साहसम्पन्न ................................निवासहेतोः।

**(२) निम्नलिखित वाक्यों का संस्कृत में अनुवाद कीजिए—**

(अ) रामदास नारायणपुर में रहता है।
(ब) नित्य सूर्य निकलने से पहले उठो।
(स) ग्वाला गायों को घास देता है।
(द) उसका पैतृक धन समाप्त हो गया।
(य) प्रतिदिन अपने कार्यों का निरीक्षण करो।
(र) कल हम साधु के पास जायेंगे।
(ल) धर्मदास दुःखी था।
(व) कर्म ही सिद्धिमन्त्र है।
(श) वह कठिन परिश्रम करता है।

## ● व्याकरणात्मक प्रश्न

१. **निम्नलिखित शब्दों में सन्धि-विच्छेद कीजिए–**
सूर्योदय, पुष्टाङ्गाः, धान्यादि, वर्षान्ते, महात्मा।

२. **निम्नलिखित शब्दों में सन्धि कीजिए–**
अत्र + एव, परम् + औदार्यम्, केन + उपायेन, न + अहं, यथा + उक्तम्।

३. **निम्नलिखित धातु-रूपों के लकार, पुरुष एवं वचन लिखिए–**
अवदत्, करोति, अपृच्छत्, दास्यति, अभवत्।

४. **निम्नलिखित शब्द-रूपों में विभक्ति एवं वचन लिखिए–**
पुत्रेण, तस्य, दारिद्रयस्य, मन्त्रे, दिने।

५. **निम्नलिखित शब्दों के विलोम शब्द लिखिए–**
प्रसन्नः, निर्धनः, दुर्बलः, अपेक्षा, अकर्मण्यता।

६. **निम्नलिखित शब्दों में प्रत्यय अथवा उपसर्ग लिखिए–**
दुर्बलः, उपगच्छावः, कृत्वा, श्रुत्वा।

७. **निम्नलिखित वाक्यों में मोटे छपे शब्दों में विभक्ति सहित कारक एवं प्रयोग का कारण लिखिए–**
(क) रामदासः **पुत्रेण** सह क्षेत्राणि गच्छति।
(ख) सः कठिनं **श्रमं** करोति।

## ● आन्तरिक मूल्यांकन

(1) सफलता प्राप्त करने के लिए आप क्या-क्या कार्य करते हैं? उसकी एक सूची बनाइये।
(2) प्रस्तुत पाठ से आपको क्या शिक्षा मिलती है, उसकी एक सूची बनाइए।

## शब्दार्थ

**ब्राह्मे मुहूर्ते** = बहुत सवेरे। **उत्थाय** = उठकर। **नित्यकर्माणि** = दैनिक कार्य। **श्रमम्** = परिश्रम, मेहनत। **प्रभूतम्** = अधिक। **हृष्ट-पुष्टाङ्गाः** = स्वस्थ शरीरवाले। **सम्पादयन्ति** = करते हैं। **अत्रैव** = यहीं। **सकलम्** = सम्पूर्ण। **उपेक्षया** = देख-रेख के अभाव में। **नोत्पद्यते** = पैदा नहीं होता। **पैतृक धनम्** = पैतृक सम्पत्ति। **अभावग्रस्तम्** = अभाव में। **प्रत्यागत्य** = लौटकर। **स्वद्वारि** = स्वयं के द्वार पर। **खिन्नम्** = खिन्न, दुःखी। **चिराद्दृष्टोऽसि** = बहुत समय बाद दिखायी पड़ रहे हो। **क्षीणविभवः** = ऐश्वर्यहीन। **अनुष्ठानम्** = विधिपूर्वक किया गया कार्य, वृत्त। **उपचर्या** = सेवा। **कर्मकाराणाम्** = श्रमिकों के। **वर्षान्ते** = वर्ष के अन्त में। **विपन्नः** = दुःखी। **अभिलषन्** = इच्छा करता हुआ। **यथोक्तम्** = कहे अनुसार। **प्रचुरम्** = अधिक। **सन्नद्धाः अभवन्** = जुट गये। **महिष्यः** = भैंसें। **दुग्धपरिपूर्णपात्रम्** = दूध से भरे हुए बर्तन को। **हस्ते दधानम्** = हाथ में लिये हुए। **सम्यक्** = अच्छी तरह। **अभीष्टम्** = इच्छित। **सम्प्रति** = अब, इस समय। **अदीर्घसूत्रम्** = निरालस्य, जो आलसी न हो। **व्यसनेष्वसक्तम्** = बुरे कामों में न लगा हो। **शूरम्** = वीर। **कृतज्ञम्** = दूसरे के द्वारा की गयी भलाई को माननेवाला। **दृढ़सौहृदम्** = पक्की मित्रता करनेवाला। **याति** = जाती है।

●